www.prepp.in

Prepp
Your Personal Exams Guide

# CSM – 45 / 15

# Indian Language & Literature
# Sanskrit

## Paper – II

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*Answer must be written in Sanskrit using Devanagari Script.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and **three** of the remaining questions, selecting at least **one** from each Section.*

## Section – A

1. अधस्तनेषु किमपि त्रयं प्रतिपादयत : 20×3 = 60

(क) वैदिकसाहित्येषु उपनिषदः स्थानं विचार्य तत्र ईशोपनिषदः स्वातन्त्र्यम् ।

(ख) संस्कृतपद्यकाव्ये माघस्य अवदानम् ।

(ग) उत्तररामचरिते भवभूतिर्विशिष्यते ।

(घ) संस्कृतमहाकाव्ये भारवेः मूल्याङ्कनम् ।

www.prepp.in

2. शूद्रकं तदीयप्रकरणञ्चावलम्ब्य कश्चन् निबन्धो विरच्यताम् । 60

3. भगवद्गीतायाः कति अध्यायाः सन्ति ? कस्यचनैकस्य विषयः समुपस्थापनीयः । 60

4. "नैषधे पदलालित्यम्" — व्याख्यायताम्। 60

## Section – B

5. A, B, C, D इति उपवर्गे केषाञ्चित् त्रयाणां व्याख्या करणीया :

[A] (i) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।

एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

(ii) क्रियासु युक्तैर्नृप ! चारचक्षुषो

न वञ्चनीयाः प्रभावोऽनुजीविभि : ।

अतोऽर्हेसि क्षन्तुमसाधु साधु वा

हितं मनोहारि च दुर्लभं वचः ॥ 20

[B] (i) यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानतः ।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

(ii) अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ।

शोकध्यानपरां दीनां नित्यं दुःखपरायणाम् ॥ 20

www.prepp.in
Prepp
Your Personal Exams Guide

[C] (i) अपूर्वकर्मचण्डालमयि मुग्धे विमुञ्च माम्।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥

(ii) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ॥
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा: ॥ 20

[D] (i) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ?
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ॥

(ii) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥ 20

6. चन्द्रापीडमुद्दिश्य शुकनासस्योपदेशानुपस्थापयत । 60

7. (क) कः सदाचारः ? सदाचारः कस्माद् देशात् शिक्षणीयः ? 30

(ख) निम्नलिखितश्लोकयोः व्याख्या विधेया : 30

(i) निवर्तयामास च राजमार्गे संपातमार्तस्य पृथग् जनस्य ।
मा भूत् कुमारः सुकुमारचित्तः संविग्नचेता इति मन्यमानः ॥

www.prepp.in

Prepp
Your Personal Exams Guide

(ii) अथो नरेन्द्रः सुतमागताश्रुः शिरस्युपाघ्राय चिरं
निरीक्ष्य ।
गच्छेति चाज्ञापयति स्म वाचा स्नेहान्न चैनं मनसा
मुमोच ॥

8. अधोलिखितेषु एकः प्रश्नः साधनीयः 60

(क) "शमादयः तु शम-दम-उपरति-तितिक्षा-समाधानः-श्रद्धाख्याः" — वेदान्तसारानुसारतः प्रतिपादयत ।

(ख) प्राचीनभारतीयसमाजव्यवस्था मनुप्रोक्तदिशा वर्णनीया ।

(ग) "शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च" — अन्नंभट्टोक्त दिशा उपस्थापयत ।